3350

# B.A. (Part I) Examination, 2022
## संस्कृत
## प्रथम प्रश्न–पत्र
## (नाटक, प्राचीन काव्य, कथा साहित्यम् अलंकाराश्च)

*Duration of Examination: 1½ Hours* *Max. Marks: 50*
*परीक्षा की अवधि: 1½ घण्टा* *पूर्णांक: 50*

***Instructions to the Candidates:***
***परीक्षार्थी के लिए निर्देश:-***

परीक्षार्थीगण सम्पूर्ण प्रश्नपत्रों में से 50 प्रतिशत अंक के प्रश्नों के उत्तर देवें। परीक्षार्थी द्वारा किन्हीं कारणों से 50 प्रतिशत अंकों से ज्यादा उत्तर देने की स्थिति में परीक्षक द्वारा उत्तरपुस्तिका का मूल्यांकन 50 प्रतिशत अंकों से ही किया जायेगा। (50 Marks)

प्र.1. अधोलिखितेषु श्लोकेषु कयोः द्वयोः श्लोक्योः सप्रसंग व्याख्या कार्या । 2x10=20

(क) धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्यवन्यैः फलै –
मनिार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते।
उत्सिक्तो विनयादपेतपुरूषो भाग्यैश्चलैर्विस्मितः
कोऽयं भो निभ्रतं तपोवनमिदं ग्रामीकरोत्वाज्ञया।।

(ख) विश्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसंदिग्धमिदं तपोवनमय धूमो हि बह्वाश्रयः।।

(ग) दुःखं व्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुखं नवत्वम्।
यात्रा त्वेषा यद विमुच्येह वाष्पं
प्राप्तानृण्या यातिं बुद्धिः प्रसादम्।

(घ) भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः
पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम्।
यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं
तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव।।

प्र.2. अधोलिखितानां श्लोकानां कयोः द्वयोः श्लोकयोः सप्रसंगम् अनुवादः विधेय – 2x5=10

(क) उदयनवेन्दुसवर्णावासवदन्तबलौ बलस्य त्वाम्।
पदमावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम्।।

(ख) नैवेदानीं तादृशाश्चक्रवाका
नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।
धन्या सा स्त्री यां तथा वेत्ति भर्त्ता
भर्तृस्नेहात् सा हि दग्धाप्यदग्धा।

(ग) स्मराम्यवन्त्याधिपेः सुतायाः
प्रस्थानकाले स्वजनं स्मरन्त्याः।
वाष्पं प्रवृत्तं नयनान्तलग्नं
स्नेहान्ममैवोरसि पातयन्त्याः।।

3350

(घ) किं वक्ष्यतीति हृदयं परिशंकितं मे
कन्या मयाप्यपहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघात:
पुत्र: पितुर्जनितरोष इवास्मि भीत:।।

प्र.3. अधोलिखितेषु प्रश्नेषु केषाञ्चित् पञ्चानां संस्कृत भाषायाम् उत्तराणि देयानि – 2x5=10

(क) 'स्वप्नवासवदत्तम्' कस्य महाकवे: रचना अस्ति ?

(ख) 'स्वप्नवासवदत्तम्' नाटके कियत् अंका: सन्ति ?

(ग) भाग्यपङ्क्ति: कथं गच्छति ?

(घ) 'स्वप्नवासवदत्तम्' नाटके स्वप्नदृश्यं कस्मिन अंके अस्ति ?

(ङ) 'स्वप्नवासवदत्तम्' नाटके नायक: क: अस्ति ?

(च) 'स्वप्नवासवदत्तस्य' विदूषकस्य किं नाम वर्तते ?

(छ) वासवदत्ता कस्य पुत्री आसीत ?

(ज) मगध नरेश: क: अस्ति ?

(झ) पदमावत्या: शय्या कुत्र आस्तीर्णा ?

(ञ) महासेन: क: आसीत् ?

प्र.4. अधोलिखितेषु कयो: द्वयो: श्लोक्यो: सप्रसंग व्याख्या करणीया – 2x5=10

(क) आत्मवान् को जितक्रोधो, द्युतिमान् कोऽनसूयक:।
कस्य बिभ्यति देवाश्च, जातरोषस्य संयुगे।।

(ख) बुद्धिमान्नीतिमान्वाग्मी, श्रीमाञ्छत्रुनिबर्हण:।
विपुलांसो महाबाहु, कम्बुग्रीवो महाहनु:।।

(ग) तं निहत्य महाबाहुर्ददाह स्वर्गतश्च स:।
स चास्य कथयामास शबरीं धर्मचारिणीम्।।

(घ) देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान्।
अयोध्यां प्रस्थितो राम: पुष्पकेण सुहृदवृत:।।

प्र.5. पञ्चलघूरात्मकानां प्रश्नानां उत्तराणि संस्कृतभाषायां देयानि – 2x5=10

(क) राम: कस्य वंशे जाता ?

(ख) रामायणस्य रचयिता क: ?

(ग) श्रीमद्वाल्मीकिरामायणम् कियत् काण्ड: सन्ति ?

(घ) रामेण सह के के वनम् अगच्छत् ?

(ङ) दशरथ: कदा स्वर्गं जगाम ?

(च) बाल्मीकिरचित 'रामायणस्य' भाषा किं अस्ति ?

(छ) रामस्य कति भ्राता: सन्ति ?

(ज) रामस्य कति भ्राता: सन्ति ?

(झ) रामस्य भार्या नाम किं अस्ति ?

(ञ) राम: गम्भीर्ये धैर्येण च कीदृश: अस्ति ?

6. सप्रसंगम अनुवाद: करणीय – 12

(क) तन्निरूपयामि तावत्। प्रकाशं ब्रूते– "कुत्र तव कङ्कणम्" व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत् – कथं मारात्मके त्वयि विश्वास: ? व्याघ्र उवाच – शृणुरे पान्थ। प्रागेव यौवनदशायामहम् अतीव दुर्वन्त आसम्। अनेक गोमानुषाणां वधाद्र मे पुत्रा मृता दाराश्च, वंशहीनश्चाहम्। तत केनचिद्धार्मिकेणाहमुपदिष्ट: दान धर्मादिकं चरतु भवान् इति। तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्त: न कथं विश्वासभूमि: ?

अथवा

अस्ति चम्पकाऽभिधानायां नगरयां परिव्राजकाऽऽवसथ:। तत्र चूडाकर्णो नाम परिव्राजक: प्रतिवसति। स च भोजनाऽवशिष्ट भिक्षाभसहितं भिक्षापात्रं नागदन्तकेऽवस्थापय स्वपिति। अहं च तदन्नम् उत्प्लुत्य उत्पमुत्य प्रत्यहं भक्षयामि। अनन्तरं तस्य प्रियसुहृद वीणाकर्णो नाम परिव्राजक समायात:, तेन सह नानाकथाप्रसङ्गावस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिमाताऽयत्। तं तथाविधं दृष्ट्वा वीणाकर्ण उवाच सखे किमिति मम कथविरक्तोऽन्यासक्तो भवान् ? 10

(ख) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा।।

अथवा

दुर्जन: परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन्।
मणिना भूषित: सर्प: किमसौ न भयङ्कर:।।

7. अधोलिखितेषु अलंकारेषु अलंकार त्रयस्य लक्षणम् उदाहरणं लक्षण संगति करणं च करणीयम् – 3x6=18

(क) अनुप्रास: (ख) यमक: (ग) उपमा (घ) उत्प्रेक्षा (ङ) दृष्टान्त (च) स्मरण

* * * * *



CamScanner

Total No. of Pages: 02

[Total No. of Questions: 04]

3351

# B.A. (Part I) Examination, 2022
## संस्कृत
## द्वितीय प्रश्न-पत्र
## (भारतीय संस्कृति के तत्व, पद्य साहित्य, अनुवाद एवं व्याकरण)
## (भारतीयसंस्कृतेः तत्त्वानि, पद्यसाहित्यं, अनुवादः व्याकरणञ्च)

*Duration of Examination: 1½ Hours* — *Max. Marks: 50*
*परीक्षा की अवधि: 1½ घण्टा* — *पूर्णांक: 50*

***Instructions to the Candidates:***

*परीक्षार्थी के लिए निर्देश:-*

परीक्षार्थीगण सम्पूर्ण प्रश्नपत्रों में से 50 प्रतिशत अंक के प्रश्नों के उत्तर देवें। परीक्षार्थी द्वारा किन्हीं कारणों से 50 प्रतिशत अंकों से ज्यादा उत्तर देने की स्थिति में परीक्षक द्वारा उत्तरपुस्तिका का मूल्यांकन 50 प्रतिशत अंकों से ही किया जायेगा। (50 Marks)

---

1. (अ) भारतीय संस्कृते का: विशेषता: ? विवेच्यताम्।

अथवा

भारतीय आश्रमव्यवस्थाया: वर्णनं क्रियताम्। 12

(आ) अधोलिखितेषु टिप्पणीत्तयं लिखत –

(क) ऋणत्रयम् (ख) विवाह संस्कार (ग) वैश्य वर्ण:

(घ) भारतीय संस्कृते मानवकल्याणाय योगदानम् (ङ) वैदिककालीन सामाजिकी स्थिति: 6+6+6=18

2. (अ) अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयो: श्लोकयो: सप्रसङ्गं अनुवाद: विधेय: –

(1) वागर्थाविव संपृक्तौ वागर्थ प्रतिपत्त्रये।
जगत: पितरौ वन्दे पार्वती परमेश्वरौ।।

(2) शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्द्धके मुनिवृत्रीनां योगेनान्ते तनुत्यजाम्।।

(3) दुदोह गां स यज्ञाय सस्याय मधवा दिवम्।
सम्पद्विनिमयेनोभै दधतुर्भुवनद्वयम्।।

(4) स शापो न त्वया राजन्न च सारथिना श्रुत:।
नदत्याकाशगङगाया: स्रोतस्युद्दामदिग्गजे।। 4+4=8

(आ) निम्नलिखित श्लोकस्य सप्रसङ्ग व्याख्या कार्या
अथ प्रदोषे दोषज्ञ: संवेशाय विशाम्पतिम्।।
सूनु: सुनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम्।।

अथवा

मन्द: कवियश: प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्वाहुरिव वामन:।। 7

(इ) अधोलिखितेषु केषाञ्चन पञ्च प्रश्नानामुत्तराणि संस्कृतेन देयानि –

(1) रघुवंश महाकाव्यस्य लेखक: क: ?

(2) दिलीप: कस्मिन् वंशे: समुत्पन्न: ?

(3) जगत: पितरौ कौ ?



CamScanner

(4) रघुवंशे कालिदासः केषां अन्वयं वक्ष्यते ?
(5) शालप्रांशुर्महाभुजः कः नृपः ?
(6) सुरभिः का ?
(7) दिलीपं का शशाप ?
(8) दिलीपस्य गुरोः नाम किम् ?
(9) दिलीपः कस्याः धेनुः सेवाम् अकरोत् ?
(10) यथापराध दण्डाः के ? 2+2+2+2+2=10

3. अधोलिखितेषु वाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादः करणीयः –
(1) आपका नाम क्या है ?
(2) मेरा नाम प्रिया है।
(3) गुरू विद्या देता है।
(4) गणेश को नमस्कार।
(5) मैं जल पीता हूँ।
(6) नदियों में गंगा सर्वाधिक पवित्र है।
(7) मैं रघुवंश पढ़ता हूँ।
(8) पुष्कर तीर्थ अजमेर में है।
(9) वह कलम से लिखता है।
(10) हम सब कल जयपुर जाएंगे। 2+2+2+2+2=10

4. (अ) कयोश्चिद् द्वयोः सूत्रयोः व्याख्या कार्या –
(1) मुखनासिका वचनोऽनुनासिकः
(2) आदिरन्त्येन सहता
(3) समाहारः स्वरितः
(4) अदर्शनं लोपः 4+4=8

(आ) कयोश्चिद् द्वयोः रूपसिद्धिः कार्या –
(1) दैत्यारिः
(2) महवरि
(3) देवैश्वर्यम्
(4) नायकः 4.5+4.5=09

(इ) कयोश्चिद् द्वयोः पदयोः सिद्धिः करणीया –
(1) रामश्शेते
(2) वागीश
(3) तल्लय
(4) हरिं वन्दे 4.5+4.5=09

(ई) कयोश्चिद् द्वयोः सूत्रयोः व्याख्या कार्या –
(1) विसर्जनीयस्य सः।
(2) अतोरोरप्लुतादप्लुते।
(3) हरि च।
(4) रो रि। 4.5+4.5=09

* * * * *



CamScanner

Total No. of Pages: 02

[Total No. of Questions: 08]

3414

# B.A. (Part-II) Examination, 2022

## संस्कृत

### प्रथम प्रश्न–पत्र

### (नाटक, प्राचीनकाव्यं, संस्कृतसाहित्यस्य इतिहास छन्दांसि व्याकरणं च)

*Duration of Examination: 1½ Hrs.*
*परीक्षा की अवधि: 1½ घण्टा*

*Max. Marks: 50*
*पूर्णांक: 50*

***Instructions to the Candidates:***
***परीक्षार्थी के लिए निर्देश:-***

परीक्षार्थीगण सम्पूर्ण प्रश्नपत्रों में से 50 प्रतिशत अंक के प्रश्नों के उत्तर देवें। परीक्षार्थी द्वारा किन्हीं कारणों से 50 प्रतिशत अंकों से ज्यादा उत्तर देने की स्थिति में परीक्षक द्वारा उत्तरपुस्तिका का मूल्यांकन 50 प्रतिशत अंकों से ही किया जायेगा। (50 Marks)

1- कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भ अनुवादः करणीयः- 7.5+7.5=15

(i) यदालोके सूक्ष्मं व्रजति सहसा तद् विपुलताम्,
यदर्धे विच्छिन्नं भवति कृतसन्धानमिव तातृ।
प्रकृत्या यद् वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात्।।

(ii) मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः।
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले,
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः।।

(iii) स्वपनो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम्।
असिन्नवृत्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः।।

(iv) वसने परिधूसरे वसाना,
नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला,
मम दीर्घं विरहव्रतं विभर्ति।।

कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भ व्याख्या कार्या- 10+10=20

(i) अधरः किसलयरागः कोमल विटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्।।

(ii) परिग्रह बहुत्वेऽपि द्वै प्रतिष्ठे कुलस्य मे।
समुद्ररसना चोर्वी सखी च युवयोरियम्।।

(iii) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या।
नादत्ते प्रियमण्डना ऽपि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः।
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।



CamScanner

(iv) भवन्ति नम्रास्तरव: फलागमै-
र्नवाम्बुभि र्दूरविलम्बिनो घना:।।
अनुद्धता: सत्पुरूषा: समृद्धिभि:,
स्वभाव एवैष परोपकारिणाम्।।

3. अभिज्ञानशकुन्तलमधिकृत्य केष्वाञ्चन पञ्चप्रश्नानाम् उत्तराणि संस्कृत भाषया देयानि- 10

(i) अभिज्ञानशाकुलन्तम् नाटकस्य प्रणेता क:

(ii) कालिदासविरचित-ग्रन्थानां नामानि लिखत।

(iii) अभिज्ञानशाकुन्तलं नाटकस्य नायक: क:?

(iv) शकुन्तलाया: सखीद्वयस्य नाम लिखत।

(v) शकुन्तलाया मातु: पितु च नाम किम् ?

(vi) विदुषां मते अभिज्ञानशाकुन्तलं नाटकस्य क: अङ्क: अधिक-रम्य अस्ति ?

(vii) मेनकाया: सखी का ?

(viii) नाटकस्य विदूषकस्य नाम किम् ?

(ix) कस्य मत्स्यस्य उदरे अङ्गुलीयकं प्राप्तम्।

(x) नाटकस्य मंगलाचरण कीदृशं बर्तते ?

4. अधोलिखित छन्दसां केषाञ्चन त्रयाणां लक्षम्, उदाहरणं लक्षणसंगतिश्च विवेचनीया- 5+5+5=15

(i) अनुष्टुप्  (ii) उपेन्द्रवज्रा

(iii) द्रुतविलम्बित  (iv) मन्दाक्रान्ता

(v) शिखरिणी  (vi) आर्या

5. रामायणस्य कथा स्वशब्देषु लिखत। 10

**अथवा**

कालिदासस्य व्यक्तित्वं कृतित्वं च विवेचयत।

6. अधोलिखितेषु कयोश्चिद् द्वयो: टिप्पणी लेखनीया। 5+5=10

(i) किरातार्जुनीयम्  (ii) दशकुमारचरितम्

(iii) उत्तररामचरितम्  (iv) हितोपदेश:

7. अधोलिखितेषु केषाञ्चन पञ्च प्रश्नानामुत्तराणि संस्कृत-माध्यमेन देयानि- 10

(i) लघुत्तयी मध्ये के ग्रन्था: परिगणिता: ?

(ii) महाभारते कति पर्वाणि सन्ति ?

(iii) नीतिशतकस्य रचयिता क: ?

(iv) कुमारसंभवं महाकाव्ये कस्य कथा विर्णता ?

(v) मृच्छंकटिकं नाटके कति अङ्का: ?

(vi) 'स्वप्नवासवदत्तम्' नाटकस्य नायक: क: ?

(vii) सुबन्धु द्वारा लिखित ग्रन्थस्य नाम किम् ?

(viii) कस्य कवे: उपमा प्रसिद्धा ?

(ix) स्त्रीपात्ररहित नाटकं वर्तते।

(x) शुकनासोपदेश: कस्य ग्रन्थस्य अंश: वर्तते ?

. केषाञ्चन पञ्चपदानां प्रकृतिप्रत्ययौ लेखनीयौ – 10

(i) सृष्टि:  (ii) प्रयोग:

(iii) रमणीया  (iv) अभिराम:

(v) मुक्त:  (vi) विच्छिन्नम्

(vii) हन्तव्य:  (viii) उपस्थिता:

(ix) प्रतिग्रहीतम्  (x) उक्तम्



CamScanner

Total No. of Pages: 02 [Total No. of Questions: 09]

3415

# B.A. (Part-II) Examination, 2022

## संस्कृत

### द्वितीय प्रश्न–पत्र

### (वैदिकसाहित्य, गद्य साहित्यम्, अनुवाद: व्याकरणम् च)

*Duration of Examination: 1½ Hrs.* *Max. Marks: 50*

*परीक्षा की अवधि: 1½ घण्टा* *पूर्णांक: 50*

***Instructions to the Candidates:***

***परीक्षार्थी के लिए निर्देश:-***

परीक्षार्थीगण सम्पूर्ण प्रश्नपत्रों में से 50 प्रतिशत अंक के प्रश्नों के उत्तर देवें। परीक्षार्थी द्वारा किन्हीं कारणों से 50 प्रतिशत अंकों से ज्यादा उत्तर देने की स्थिति में परीक्षक द्वारा उत्तरपुस्तिका का मूल्यांकन 50 प्रतिशत अंकों से ही किया जायेगा। (50 Marks)

1- अधोलिखित मंत्रयो: व्याख्या करणीया-

(क) अग्नि ना रयिमश्नवत् पोषमेव दिवे दिवे। 5
यशसं वीरवत्तमम्

अथवा

त्वं विश्वस्य मेधिर दिवश्यग्मश्च राजसि
स यामनि प्रति श्रुधि।

(ख) यो हत्वाहिमरिणात् सप्त सिन्धून, 5
यो गा उदाजपदधा बलस्य
यो अश्मनोरन्तरग्निं जजान
संवृक् समत्सु स जनास इन्द्र:।।

अथवा

समानोमन्त्र: समिति समानी
समानं मन: सह चित्तमेषाम्।
समानं मन्त्रमभि मन्त्रये व:
समानेन वो हविषा जुहोमि।।

2. पञ्चलघूत्तरात्मक प्रश्नानां संस्कृत भाषायां उत्तराणि देयानि- 5×2=10

(क) अग्नि सूक्तस्य ऋषि: कोऽस्ति ?

(ख) वरूण सूक्ते प्रयुक्त छन्दस: किं नाम ?

(ग) 'सञ्जानाना उपासते' कस्य सूक्तस्य मंत्रमस्ति ?

(घ) कस्मान् न ऋते विजयन्ते जनास: ?

(ङ) विश्वदेवा सूक्तस्य ऋषि कोऽस्ति ?

(च) ऋग्वेदस्य कस्मात् मण्डलात् प्रजापतिसूक्तम् उद्धृतम् ?

(छ) संज्ञानसूक्तस्य देवतानाम किम् ?

3. अधोलिखित मन्त्रस्य ससन्दर्भ व्याख्या करणीया- 10
कुर्वन्नहे कर्माणि जिजीविशेच्छतम् समा:।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

अथवा

स पर्यगाच्छूक्रमकायमव्रण मस्नाविरं शुद्धमपापद्धिम्।
कविर्मनीषी परिभू: स्वयम्भूर्याथा-
तथ्यतोऽर्थाने व्यदधाच्छाश्वतीभ्य: समाभ्य:।।

3415

अधोलिखितगद्यांशेषु कश्चिद् द्वयोः अनुवादः करणीयः। 2×10=20

(क) तात चन्द्रापीड! विदित-वेदिव्यस्याधीत सर्वशास्त्रस्यते नाल्पमप्युपदेष्ट व्यमस्ति। केवलं च निसर्गत एवं आभानुभेद्य मरत्नालोकोच्छेद्यमप्रदीप-प्रभापनेयमति गहनं तमो यौवन प्रभवम्।

(ख) गुरूपदेशश्च नाम पुरूषाणामधिल मल प्रक्षालनक्षमम् अजलं स्नानम्, अनुपजात पलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपित मेदोदोषं गुरूकरणम्, असुवर्ण विरचनम् अग्राम्यं कर्णाभरणम्-अतीत ज्योतिरालोकः नोद्वेगरः प्रजागरः। विशेषण तु राज्ञाम् विरला हितेषामुपदेष्टारः।

(ग) इदमेव च पुनः पुनरभिधीयसे विद्वांसमपि सचेत नमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरूषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति। सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतुभवान्नव यौवराज्याभिषेक मङ्गलम्।

पञ्चप्रश्नानामुत्तराणि संस्कृत भाषायां देयानि-

(क) यौवराज्याभिषकं चिकीर्षुः राजानाम किम् ?

(ख) शुकनासोपदेशः कस्य ग्रन्थस्य भागः ?

(ग) कस्य मदः अपरिणामोपशमो दारूपो भवति ?

(घ) यौवने यूनां दृष्टि कीदृशीं भवति ?

(ङ) प्रबोध घोटा कस्य निद्रा भवति?

(च) अनर्थ कं परम्परा का:?

(छ) लक्ष्मी कं जनं नालिङ्गति ?

अधोलिखित दशवाक्यानां हिन्दी भाषायां अनुवाद क्रियताम्- 10

(क) एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च।

(ख) विद्या हीना न शोभन्ते निर्गन्धा इव किंशुकाः।

(ग) किमिव हि मधुराणां मण्डनं नाकृतीनाम्।

(घ) भवितव्यानां द्वाराणि भवन्ति सर्वत्र।

(ङ) गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोशाः।

(च) आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः।

(छ) ज्ञानं भारः क्रियां विना।

(ज) लिखितमपि ललाटे प्रोज्झितुं कः समर्थः।

(झ) उदारचरितानां तु वसुधैव कुटुम्बकम्।

(ञ) निरस्तपादपे देशे एरण्डोऽपि द्रमायते।

(ट) दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन्।

(ठ) सुतप्रमपि पानीयं शमयत्येव पावकम्।

(ड) आर्तत्राणाय वः शास्त्रं न प्रहर्तु मनागसि।

(ढ) ध्रुवं स नीलोत्मलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति।

अधोलिखितेषु केषाञ्चित् त्रयाणां सूत्राणां सोदाहरणं व्याख्या विधेया- 3×3=9

(क) तस्माच्छसो नः पुंसि
(ख) ओसि च
(ग) जसि च
(घ) जसः शी
(ङ) याडापः
(च) जश्शसोः शिः

अधोलिखितेषु त्रयाणां पदानां सूत्रोल्लेखपूर्वकं सिद्धिः करणीया- 3×3=9

(क) रामाय
(ख) रामस्य
(ग) रमयोः
(घ) ज्ञानम्
(ङ) वारीणि
(च) भानुना

अधोलिखितेषु केषाञ्चित् चतुर्णां रेखांकित पदानां सूत्रोल्लेख पूर्वकं अशुद्धिसंशोधनं करणीयम्- 4×3=12

(क) अश्वेन धावकः पततिः।
(ख) सरस्वतीं नमः।
(ग) रामाय सह आगतः अर्जुनः
(घ) याचकैः धनं यच्छति।
(ङ) नागरात् परितः राजमार्गं अस्ति
(च) पादात् खञ्जः।



CamScanner

Total No. of Pages: 02

[Total No. of Questions: 08]

3005

# B.A. (Part-III) Examination, 2022
## SANSKRIT
## First Paper
## (भारतीय धर्म दर्शनं च)

*Duration of Examination: 90 Minutes*
*परीक्षा की अवधि: 90 मिनट*

*Max. Marks: 50*
*पूर्णांक: 50*

***Instructions to the Candidates:***
***परीक्षार्थी के लिए निर्देश:-***

परीक्षार्थीगण सम्पूर्ण प्रश्नपत्रों में से 50 प्रतिशत अंक के प्रश्नों के उत्तर देवें। परीक्षार्थी द्वारा किन्हीं कारणों से 50 प्रतिशत अंकों से ज्यादा उत्तर देने की स्थिति में परीक्षक द्वारा उत्तरपुस्तिका का मूल्यांकन 50 प्रतिशत अंकों से ही किया जायेगा।

1. अधोलिखितेषु कयोश्चिद् द्वयोः सप्रसंङ्ग व्याख्या कार्या- 15
   (i) द्रव्यगुणकर्मसामान्य विशेषसमवायाऽ भावाः सप्त पदार्थाः।
   (ii) सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् सा द्विविधास्मृतिरनुभवश्च।
   (iii) प्रत्यक्षज्ञान-हेतुरिन्द्रियार्थ सन्निकर्षः षड्विधः। संयोगः संयुक्त समवायः संयुक्त समवेत समवायः, समवायः समवेत-समवायो, विशेषण-विशेष्यभावश्च इति।
   (iv) निम्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोः द्वयोर्मध्ये एकमविनश्चय-दपराश्रितमेवावतिष्ठते तौ अयुतसिद्धौ।
2. निम्नलिखितेषु केषाञ्चन पञ्चप्रश्नानामुत्तराणि संस्कृतमाध्येन देयानि- 10
   (i) तर्कसंग्रहः कस्य दर्शनस्य ग्रन्थः अस्ति ?
   (ii) कति द्रव्याणि ? नामानि लिखत।
   (iii) गन्धवती का ?
   (iv) अभावः कतिविधः
   (v) ऊर्ध्वदेश-संयोग हेतुः किम् ?
   (vi) प्रत्यक्षं किम्?
   (vii) रसनाग्रहह्यो गुणो कः ?
   (viii) आत्मा कतिविधः ?
   (ix) उपमितिकरणं किम् ?
   (x) कति हेत्वाभासाः ?
3. अधोलिखितेषु कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भ व्याख्या विधेया- 15
   (i) गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके।
   हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रूधिरप्रदिग्धान।।
   (ii) न जायते म्रियते वा कदाचिन्नाय भूत्वा भविता वा न भूयः।
   अजो नित्यः शाश्वतो वयं पुराणों न हन्यते हन्यमाने शरीरे।।
   (iii) सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
   ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।
   (iv) प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान।
   आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।।
4. अधोलिखितेषु पञ्चप्रश्नानामुत्तराणि संस्कृतमाध्येन देयनि- 10
   (i) गीता कस्य ग्रन्थस्य अंशः अस्ति ?
   (ii) 'पार्थ' इति कस्य कृते प्रयुक्तः अस्ति ?



CamScanner

(iii) मधुसूदन: क: ?
(iv) अर्जुन कस्य शिष्य : (द्वितीय अध्यायानुसारं)
(v) गतासूनगतासूंश्च के नानुशोचन्ति ?
(vi) क: हन्ति न हन्यते ?
(vii) 'अचलोऽयं सनातन:'' इति कस्य कृते लिखितम् ?
(viii) समत्वं किम् उच्यते ?
(ix) कस्य प्रज्ञा प्रतिष्ठिता ?
(x) क्रोधात् क: भवति ?

5. अधोलिखितेषु सूत्रेषु कयोश्चित् द्वयो: सूत्रयो: व्याख्या करणीया- 15
(i) योगश्चित्तवृत्तिनिरोध:।
(ii) विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्।
(iii) भवप्रत्ययो विदेहप्रकृतिलयानाम्।
(iv) ऋतम्भरा तत्र प्रज्ञा।
(v) वीतरावविषयं वा चित्रम्।

6. निम्नलिखितेषु केषाञ्चन पञ्चप्रश्ननामुत्तराणि लिखत- 10
(i) योगसूत्रस्य प्रणेता क: ?
(ii) योगसूत्रम प्रथम पादस्य नाम किम् ?
(iii) योगस्य का परिभाषा ? (योगसूत्रमधिकृत्य)
(iv) कति वृत्तय: ?
(v) योगसूत्रानुसारं कति प्रमाणानि ? नामानि लिखत-
(vi) स्मृति: का ?
(vii) क: विकल्प: ?
(viii) अभावप्रत्ययाऽऽलम्बना वृत्ति: का ?
(ix) ईश्वर: क: ?
(x) निर्वितर्का समाधि: का ?

7. अधोलिखितेषु त्रयाणां श्लोकानां सप्रसङ्गं-व्याख्या कार्या- 15
(i) वेदोऽखिलो धर्ममूलं स्मृतिशीले च तदिवदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।
(ii) कृष्णसारस्तु चरति मृगो यत्र स्वभावत:।
स ज्ञेयो यज्ञियो देशो मलेच्छदेशस्त्व: पर:।।
(iii) ब्राह्मर्णो बैल्वपालाशौ क्षत्रियो वाटखादिरौ।
पैलवोदुम्बरो वैश्यो दण्डानर्हन्ति धर्मत:।।
(iv) ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यो गुरो: स्मृत:।।
संहत्य हसतावध्येयं स हि ब्रह्मञ्जलि: समृत:।
(v) अभिवादनशीलस्य नित्यं वृद्धोपसेविन:।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम्।।

8. निम्नलिखितेषु पञ्च प्रश्ननामुत्तराणि देयानि- 10
(i) सर्वज्ञानमयो हि क: ?
(ii) धर्मं जिज्ञासमानां परमं प्रमाणं किम् ?
(iii) देवनिर्मितं देशं किं प्रचक्षते ?
(iv) ब्राह्मणस्य नामघेयं कीदृशं स्यात् ?
(v) राज्ञ: उपनायनं कदा करणीयम् ?
(vi) य: प्राङ्गमुखो भुङ्क्ते स: किं लभते ?
(vii) वैश्यस्य केशान्त: कदा विधीयते ?
(viii) कति ज्ञानेन्द्रियाणि (बुद्धि-इन्द्रियाणि;) ? नामानि लिखत ।
(ix) माता काभ्यो गरीयसी ?
(x) आचार्याणां शतं क: ?



CamScanner

3006

# B.A. (Part-III) Examination, 2022
## SANSKRIT
## Second Paper
## (काव्यम् अर्थावबोधः व्याकरणं निबन्धश्च)

*Duration of Examination: 90 Minutes* *Max. Marks: 50*
*परीक्षा की अवधि: 90 मिनट* *पूर्णांक: 50*

***Instructions to the Candidates:***
***परीक्षार्थी के लिए निर्देश:-***

परीक्षार्थीगण सम्पूर्ण प्रश्नपत्रों में से 50 प्रतिशत अंक के प्रश्नों के उत्तर देवें। परीक्षार्थी द्वारा किन्हीं कारणों से 50 प्रतिशत अंकों से ज्यादा उत्तर देने की स्थिति में परीक्षक द्वारा उत्तरपुस्तिका का मूल्यांकन 50 प्रतिशत अंकों से ही किया जायेगा।

1. अधोलिखितेषु कयोः द्वयोः श्लोकयोः सप्रसङ्ग-व्याख्या कार्या- 12

(क) सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते।।

(ख) शीलं प्रधानं पुरूषे तद् यस्येह प्रणश्यति।
न तस्य जीवितेन अर्थो न धनेन न बन्धुभिः।

(ग) तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम्।
उपायज्ञो मनुष्याणां नरः पण्डितः उच्चयते।

(घ) नवद्वाशमिदं वेश्म त्रि स्थूणं पञ्चसाक्षिकम्।
क्षेत्रज्ञाधिष्ठितं विद्वान् यो वेद सः परः कविः।

2. अधोलिखितेषु केषाञ्चित् चतुर्णां प्रश्नानाम् उत्तराणि हिन्दी भाषायां देयानि- 8

(क) चारैः पश्यन्ति के ?

(ख) राज्ञां बलं किम् अस्ति ?

(ग) धर्मेण किं विन्देत् ?

(घ) के षड् जनाः नित्य दुःखिता सन्ति ?

(ङ) कः पण्डितः उच्यते ?

(च) लोके यशः कः प्राप्नोति ?

(छ) स्वर्गस्य सोपानं किम् ?

(ज) कीदृशो नरः सर्वदा सुखी भवति ?

3. अधोलिखितेषु कयोः द्वयोः ससंदर्भ व्याख्या कार्या- 12

(क) तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसङ्गमात्
वरं विरोधोऽपि समं महात्मभिः।।

(ख) पुरःसरा धामवतां यशोधना:
सुदु:सहं प्राप्य निकारमीदृशम्।
भवादृशाश्चेदधिकुर्वते रतिम्
निराश्रया हन्त हता मनस्विता।।

(ग) विधाम रक्षान्परित: परेतरान्
अशङ्कितात्कारमुपैति शंकित:।।
क्रियापवर्गेष्वनुजीविसात्कृता:।
कृतज्ञतामस्य वदन्ति सम्पद:।।

(घ) निशम्य सिद्धिं द्विषतामपाकृति:
ततस्ततस्त्या: विनिमन्तुमक्षमा।
नृपस्य मन्युव्यवसायदीपनी:
उदाजहारद्रुपदात्मजा गिर:।।

4. अधोलिखितेषु केषां चतुर्णां प्रश्नानाम् उत्तराणि देयाति- 8

(क) किरातार्जुनीयमहाकाव्ये कति सर्गा: सन्ति ?

(ख) अस्य महाकाव्यस्य रचयिता क: अस्ति ?

(ग) आखण्डलसूनु: क: आसीत्।

(घ) गुप्तचराणां गिर: कीदृशी भवति ?

(ङ) हितं मनोहारि च दुर्लभं किम् ?

(च) कां सहसा न विदधीत ?

(छ) वनेचर: कस्मिन् वने युधिष्ठरं समाययौ ?

(ज) वृकोदर: क: आसीत् ?

5. अधोलिखितेषु कयो: द्वयो: ससंदर्भ व्याख्या कार्या- 12

(क) यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्ध: समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मन:।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगत:।।

(ख) प्रारभ्यते न खलु विघ्नभयेन नीचै:
प्रारम्भ विघ्नविहता विरमन्ति मध्या:।
विघ्नै: पुन: पुनपि प्रतिहन्यमाना:
प्रारब्धमुत्तमजना: न परित्यजन्ति।।

(ग) यस्यास्ति वित्तं स नर: कुलीन:
स पण्डित: स श्रुतवान् गुणज्ञ
स एव वक्ता स च दर्शनीय:
सर्वे गुणा: काञ्चनमाश्रयन्ति।।



CamScanner

(घ) निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथोष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।।

6. अधोलिखितेषु केषां चतुर्णां प्रश्नानाम् उत्तराणि देयानि-

(क) नीतिशतकग्रन्थस्य कः रचयिता ?

(ख) राजसु का पूज्यते ?

(ग) ब्रह्माऽपि कं नरं न रञ्जयति ?

(घ) मनस्विनः का द्वयी वृत्तिः ?

(ङ) प्रच्छन्नं धनं किं भवति ?

(च) सत्सङ्गति वाचि किं सिञ्चति ?

(छ) ऐश्वर्यस्य विभूषणं किम् ?

(ज) वित्तस्य तिस्रो गतयः काः ?

7. निम्नलिखितेषु कमप्येकं विषयमधिकृत्य संस्कृतभाषायां निबन्धः लेख्यः- 1

(क) सत्सङ्गतिः।

(ख) संस्कृतभाषायां महत्तवम्

(ग) मम प्रियः कविः।

(घ) विद्या धनम्

8. कयोः द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या- 5

(क) झोऽन्तः

(ख) तस्थस्थमिपां तान्तन्तामः।

(ग) मेर्निः

(घ) अतो दीर्घो यञि।

9. केषां पञ्चपदानां सूत्रोल्लेखपूर्वकं सिद्धिः कार्या- 15

(क) भवति

(ख) चोरयति

(ग) अदन्ति

(घ) तुदति

(ङ) ऐद्यत

(च) भविष्यसि

(छ) दीव्यति

(ज) सुनोमि

(झ) तनोतु

(ञ) अत्स्यति



CamScanner

10. अधोलिखितं गद्यांश पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायां देयानि-

प्राचीनकाले मानवजीवनं चतुर्षु आश्रमेषु विभक्तम् आसीत्। एते आश्रमाः क्रमशः ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यासश्च चत्वारो हि आसन्। आपञ्चविंशति-वर्षं ब्रह्मर्याश्रमस्य समय आसीत्। अस्मिन् आश्रमे विद्याध्ययनं, तपोममजीवनं, सर्वविधगुणानां सङ्ग्रहश्च प्रधानं कर्त्तव्यमासीत्। आपञ्चाशत-वर्षं गृहस्थाश्रमः। भौतिकी शारीरिकी मानसिकी च समुन्नतिः, विषयाणानुपभ्झोगः, दाम्पत्यजीवनयापनं, वंशप्रतिष्ठामै सन्तानोत्पत्तिश्च अस्मिन् आश्रमे विशिष्ट कर्म आसीत्। पञ्चाशद् वर्षानन्तरं वानप्रस्थाश्रमे प्रवेशों भवेदिति। अत्र ? सपत्नी केशवाराधनं, संयमपालनं, योगादिकर्मसु विशिष्टा प्रवृत्ति प्रमुख -कर्माणि आसन्। अन्तिमाश्रमो सन्यासाश्रमः आसीत्। भौतिकविषयन् परित्यज्य योगाभ्यासे रतिः पुण्यार्जने प्रवृत्तिः समाधौ मनसः स्थितिः, लोकोपकरणे च विनियुक्तिः परिव्राजकानां प्रथमं कर्त्तव्यम् आसीत्।

(क) उपर्युक्त गद्यांशस्य शीर्षकं देयम्। 2

(ख) अस्य गद्यांशस्य सारसंक्षेपं करणीयम्। 3

(ग) अधोलिखितानां प्रश्नानाम् उत्तराणि देयानि- 5

(i) कति आश्रमाः आसन् ?

(ii) वंशप्रतिष्ठायै कः आश्रमः ?

(iii) भौतिक विषयान् कः आश्रम परित्यजति ?

(iv) कति वर्षानन्तरं वानप्रस्थाश्रमः भवति ?

(v) तपोमयजीवनं कस्य आश्रमस्य प्रधानं कर्त्तव्यमासीत् ?



CamScanner